श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री वरदवेदान्ताचार्यस्य (काटन्देत्ति आण्डवन्) कृतिषु

# ॥ श्री कोमळा दण्डकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कोमळा दण्डकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

जय दुग्धाब्धि तनये जय शार्ङ्गधर प्रिये।
जय कारुण्य सुरभे जय लावण्य वारिधे॥

## *प्रथम चरणः*

जय जय जय दीव्यदिन्दीवरच्छाय कूलङ्कष स्यन्दि कालिन्दि कामन्द मन्दानिलोदञ्चि वीची समीचीन वेणी भवत्केश पाशातिथीभूत पाथोधरे ! पीतवासोधरे ! बिम्बशोणाधरे ! जृम्भमाणामृता भीशु बिम्बायुतेनाशु सम्प्राप्त सौन्दर्य वक्त्रारविन्दे ! दर स्पन्द पक्ष्म द्वयी पक्ष संलक्ष्य चक्षुर्मिलिन्दे ! सुधा सध्र्युगुक्तिच्छलोद्यन्मरन्दे ! गिरं देहि देवीडितुं त्वाभिवन्दे ! रदस्पर्धि कुन्देऽनुरज्यन्मुकुन्दे ! शरत्पर्वचन्द्र क्षरच्चन्द्रिकाऽखर्व गर्वैक सर्वङ्कष स्फार रोचि स्फुरन्मन्दहासे ! लसच्चन्द्रहासे ! तनीयो नत भ्रूयुगी योपमानीय दामोदमानेषु चञ्चच्छरासे दयासार सारोल्लसत् दृग्विलासे ! ततो भक्तिभाजां कृतांहोनिरासे ! मणीमण्डल प्रोल्लसत्कुण्डले ! तज्जितोदग्र भाभानु मन्मण्डले ! कम्बु दुष्प्राप कण्ठाभयालङ्कृते ! कंसजित् सत्कृते कञ्जगर्भस्थिते ! कुम्भि कुम्भ प्रति द्वन्द्वि वक्षो रुहे ! बाहु दम्भोल्लसत् कल्प कानोकहे ! शात कुम्भ द्युते ! साधु कुम्भ स्तुते ! हे सरस्वत्सुते ! योगि हृद्दुर्ग्रहाकार मध्ये ! महा भोगि मध्ये शया धीश वक्ष स्थलावास शीलेऽखिलाशास्य लीले ! कला पुष्कले ! मञ्जु शिञ्जान मञ्जीर चञ्चत्पदे ! किञ्च कञ्जत्पदे ! सर्व संपत्प्रदे।

## *द्वितीय चरणः*

कमितुरुरसि कौस्तुभाभा परीवाह बालातपोदार पादारविन्द प्रभे ! पाहि पद्मे शुभे ! पद्म संलाञ्छिते प्रत्त सद्वाञ्छिते ! भक्तलोकाञ्चिते ! वेद वेदान्त वेद्येऽन्य

दुर्निग्रहोदीर्ण दौर्गत्य वैद्येऽनवद्ये ! वधूमात्र दुष्प्राप सद्रूप धेये ! जगत्पावयन्नाम धेये ! हरे रूपधेयानु रूपे ! दृशा निर्जित त्रस्त सद्रूप धेये ! वपुश्शोभयाऽधो भवज्ञात रूपेऽति लावण्य रामा समाजाभि रामे ! रमे ! मञ्जु कञ्जत् स्फुरत् पाणि पाथो रुहे ! बंभ्रमद्बंभर प्रेयसी पालिकामोह विश्राणन प्रक्रियैकाग्र पुङ्खानु पुङ्खानु धावत् कटाक्ष प्रवाहे ! मृणाल प्रति स्फर्धि बाहे ! ललाटे लसच्चित्रकी चक्रित न्यङ्कुनाभे ! सुधायास्सनाभेऽनुभावातुला विप्रभास्वत्तुला कोटि युक्तेऽमृत स्यन्दि सूक्ते ! अभिवन्दारु मन्दार सन्तान शाखे ! विशाखेश लोकेश मेघे शयानादि नानादिवौकोभिराराधिते भारती वन्दिते पार्वती नन्दिते वासवी सेविते का समा देविते।

## *तृतीय चरणः*

अयि जननि दया सुधासार संप्लावितापाङ्ग संभावितोयस्त्वयावास भूमिः श्रियाऽनन्य साधारणी भूतयाऽऽश्लिष्यते तावदध्युष्यते तद्गृहद्वार मुद्यन्मदैर द्रिवत्बन्धुरैरप्युदञ्चन् मरुद्बान्धवैः सैन्धवैरंशुमन् मण्डली नन्दनैः स्यन्दनैः पत्तिभिः प्राप्तसंपत्तिभिर्विस्मृता पत्तिभिः संहतिर्वैरिणां तेन सञ्जीयते ! जायते तद्विषां प्राणनं काननं तस्य चेदाननं भारती मञ्जु भद्रासनं शासनम् तस्य चेत् सर्वसर्वं सहाधीश चूडायते ! तद्वशी बोभवीत्युर्वशी भूयते तत्परी रम्भ संरम्भया रंभया ! वाहनं तस्य चैरावतो वाथवा वारिदो गीयते तद्यशस्सर्व हाहादि गन्धर्व वर्गैरलं पुष्कलम् तद्यशस्स्रोतसा सर्वदिग् पूर्यते तस्य सिध्यन्ति नानापुमर्थाः विना तेन के वा समर्था जनाः किं परं वर्ण्यते यत्तवा पाङ्गतो विश्वमेतच्चर स्थावराकार मध्येधते पाहि पद्मालये पाहि पद्माननने ! पाहि कारुण्य सिन्धो ! नमस्ते समस्तेप्सितार्थ प्रदानैकतानैक हस्ते ! मुहुस्ते पुनस्ते नमस्ते समस्ते नमस्ते नमः।

सामादि श्रुति घोषितात्म विभवा हेमार विन्दासना
धामाधः कृत दिव्य काञ्चनरुचिः सोमाभि रामानना।
रामा शार्ङ्गधरस्य कोमल लता नामास्तु भूमौ सताम्
सीमा सद्गुण सम्पदामविरत क्षेमाय भामा मणिः॥

पत्युः प्रभावलयि कौस्तुभ वैजयन्ती
श्रीवत्सभूषण मुरः परिभूषयन्ती।
दुग्धांबुराशि कुलमङ्गळ वैजयन्ती
श्री कोमाळास्तु सततं सुगुणैर्जयन्ती॥

॥ इति श्री कोमळा दण्डकं सम्पूर्णम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥